# Shri Pramukhasvamimaharajamahima Ashtakam

# શ્રીપ્રમુખસ્વામિમહારાજમહિમાષ્ટકમ્

## Document Information

Text title : Shri Pramukhasvamimaharajamahima Ashtakam

File name : pramukhasvAmimahArAjamahimAShTakam.itx

Category : deities_misc, svAminArAyaNa, gurudev, aShTaka

Location : doc_deities_misc

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીપ્રમુખસ્વામિમહારાજમહિમાષ્ટકમ્

(શાર્દૂલવિક્રીડિતમ્)
શોભન્તે શુભસાધુશીલસરલા નિર્વેદપૂર્ણાઃ ક્ષિતૌ
શાસ્ત્રિશ્રીગુરુયોગિનોશ્ચ પરમા પ્રાપ્તા ભવદ્ભિઃ કૃપા ।
ધૃત્વા ધર્મધુરાં સમુદ્રમનસો ગમ્ભીરનમ્રા વિદા
નારાયણસ્વરૂપદાસગુણિનઃ સ્નેહેન વન્દે હ્યહો ॥ ૧॥

ગણ્યન્તે જલરાશિબિન્દુનિચયા આકાશતારાગણા
ભૂમેર્ધૂલિકણા ભવદ્ગુણગણાઃ કિં કેશવિષ્ણ્વાદિભિઃ ।
વ્યાસો વેદપુરાણનિર્મિતપરોઽશક્તોઽભવત્ ત્વત્સ્તુતૌ
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૨॥

સ્પર્શઃ સ્પર્શમણેઃ કરોતિ કનકં લોહં સુજીર્ણં બલી
દેહ તુચ્છતમં વિચાર્ય ચરતો યોગોઽમલસ્તેઽનિશમ્ ।
સંયુક્તે વિમુખાન્ મહાવ્યસનિનો ભક્તૌ હરેર્નાસ્તિકાન્
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૩॥

ધર્મજ્ઞાનવિરાગભક્ત્તય ઇમે ખ્યાતા ગુણાસ્તાવકા
એકૈકં વિનિપાતિતું કૃતપણાઃ સ્પર્ધાવિલગ્ના નુ કિમ્ ।
માર્તણ્ડસ્ય મરીચિભિશ્ચ સદ્રશા ભાન્તિ પ્રહન્તું તમો
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૪॥

વાણી તેઽમૃતવર્ષિણી જનહિતા પાપૌઘવિધ્વંસિની
રમ્યં શાન્તિકરં નિતાન્તસુખદં ત્વદ્દર્શનં પાવકમ્ ।
નૈપુણ્યં સકલોપમાનરહિતં સાધ્વી ક્રિયા જ્ઞાનદા
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૫॥

પાણ્ડિત્યે સતિ સાધુતા ન મહિતા તસ્યાં ન ચેત્ પ્રાજ્ઞતા
વૈરી તદ્ગુણરાજિરાશિરમિતઃ સાકં ત્વયિ દ્યોતતે
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૬॥

સ્વામિંસ્તે પ્રસૃતપ્રભાવનિવહઃ સૂર્યપ્રભાવં તથા
શૈત્યં શીતકરસ્ય તચ્છિખરિણઃ સ્થૈર્યં ક્ષમત્વં ક્ષિતેઃ ।
નિર્લેપત્વગભીરતે સુરપથામ્ભોધ્યોર્વિધત્તેપ્યધો
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૭॥

મેઘં વાઞ્છતિ ચાતકોઽમૃતકરં પક્ષી ચકોરો યથા
પાતિવ્રત્યપરાયણા નિજપતિં વહ્નિં પતઙ્ગસ્તથા ।
શ્રીજીમૂર્તિસદાનિષક્ત-હૃદયશ્ચાન્યાન્ કરોતિ પ્રભૂન્
વન્દે ત્વાં પ્રમુખં ગુણાલયગુરું મોક્ષાય ભક્ત્યા સદા ॥ ૮॥

ત્વમેવાસિ નારાયણસ્ય સ્વરૂપં,
ત્વમેવાસિ મૂલાક્ષરસ્ત્વં પ્રયાગઃ ।
ત્વમેવાસિ શાસ્ત્રી ચ યોગી ત્વમેવ,
ત્વમેવં ચિરાયુશ્ચિરઙ્કૃત્ ત્વમેવ ॥ ૯॥

(તોટકવૃત્તમ્)
સરલં સુહૃદં પવિતં મનસા,
લલિતં મધુરં સુનૃતં વચસા ।
નિપુણં સુદૃઢં સુસહં ક્રિયયા,
પ્રણમામિ ગુરું પ્રમુખં ગુણિનમ્ ॥ ૧૦॥

ઇતિ શ્રીપ્રમુખસ્વામિમહારાજમહિમાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Pramukhasvamimaharajamahima Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*